# Kailaseshvaralingapujakathanam

# કૈલાસેશ્વરલિઙ્ગપૂજાકથનમ્

## Document Information

Text title : Kailaseshvaralingapujakathanam

File name : kailAseshvaralingapUjAkathanam.itx

Category : shiva, shivarahasya, pUjA

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 36 - kailAseshvarapUjAvidhAnakathanam | 1-39||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 19, 2023

*sanskritdocuments.org*

# કૈલાસેશ્વરલિઙ્ગપૂજાકથનમ્

સ્કન્દ ઉવાચ -
તલ્લિઙ્ગજાતાસ્સર્વેઽપિ ભુવનાનિ ચતુર્દશ ।
તલ્લિઙ્ગજાતા દેવાદ્યા બ્રહ્મવિષ્ણુહરાદયઃ ॥ ૧॥

તલ્લિઙ્ગે સંસ્થિતા લોકાસ્સપ્તદ્વીપવનાકરાઃ ।
પ્રલયેઽપિ લયં યાન્તિ સર્વે લોકાસ્સુરૈસ્સહ ॥ ૨॥

લયનાલ્લિઙ્ગમિત્યુક્તં લીનં યસ્મિઞ્જગદ્ગતમ્ ।
તસ્માલ્લિઙ્ગં મુને પ્રોક્તં તત્કૈલાસેશ્વરસઞ્જ્ઞિતં ॥ ૩॥

યતો વાચો નિવર્તન્તે અપ્રાપ્ય મનસા સહ ।
ભૂમૌ તચ્ચ મહાલિઙ્ગં પ્રતિષ્ઠાપુચ્છમેવતુ ॥ ૪॥

એકં બ્રહ્મૈવ તલ્લિઙ્ગમલિઙ્ગમપિ ભૂસુરાઃ ।
તદેવ જ્યોતિષાં જ્યોતિસ્તદ્ધૈ ચેતનચેતનમ્ ॥ ૫॥

તલ્લિઙ્ગં સત્યમાનન્દમખણ્ડૈકરસંસદા ।
તલ્લિઙ્ગદર્શને વાઽપિ નવાગ્ગચ્છતિ નો મનઃ ॥ ૬॥

નેતિ નેતિ ચ વેદાન્તૈસ્તલ્લિઙ્ગં પ્રતિપાદ્યતે ।
તદેવ બ્રહ્મ ત્વં વિદ્ધિ નેહ નાનાસ્તિ કિઞ્ચન ॥ ૭॥

ઋતં સત્યં પરં બ્રહ્મ તદાત્મામનસોઽતિગમ્ ।
નિરિન્દ્રિયં નિષ્કલઙ્કમસઙ્ગમજરં હિ તત્ ॥ ૮॥

પ્રભું સમસ્તભૂતોત્થસર્વધર્મવિવર્જિતમ્ ।
આકાશં તદનાકાશં સાકારઞ્ચ નિરાકૃતિ ॥ ૯॥

કારણં કારણાનાઞ્ચ બ્રહ્મ તલ્લિઙ્ગમેવહિ ।
નામરૂપાતિગં શાન્તં ગુણાતીતં ગુણાસ્પદમ્ ॥ ૧૦॥

અપાણિપાદમત્યચ્છમાનન્દઘનમદ્વયમ્ ।

શિવસ્ય નિર્ગુણં રૂપમદૃશ્યમકૃતાત્મભિઃ ॥ ૧૧॥

તદેવ વ્યાપકં ભાતિ તલ્લિઙ્ગન્તમસઃ પરમ્ ।
તન્ન વેદૈશ્ચ વેદાન્તૈર્ગુરુભિશ્શ્રુતિભિસ્તદા ॥ ૧૨॥

નપ્રાપ્યં સર્વદા સર્વૈર્દ્રષ્ટું તચ્ચાપ્યથા શ્રિતુમ્ ।
તદેવ દેવદેવસ્ય નિર્ગુણં રૂપમદ્ભુતમ્ ॥ ૧૩॥

નિર્ગુણઞ્ચાઽપિ લોકાનાં દૃષ્ટિગોચરવત્સ્થિતમ્ ।
તલ્લિઙ્ગં સર્વદા શમ્ભુર્દેવ્યા પૂજયતિસ્વયં ॥ ૧૪॥

બાહ્યૈરાભ્યન્તરૈશ્ચાઽપિ પૂજાભિઃ પરમેશ્વરઃ ।
ત્રિણેત્રો નીલકણ્ઠશ્ચ ચન્દ્રાર્ધકૃતશેખરઃ ॥ ૧૫॥

અહમ્ભાવાદિરહિતો ભાવાભાવવિવર્જિતઃ ।
અહં બ્રહ્મૈવેદમિતિ યં વદન્તિ નરામરાઃ ॥ ૧૬॥

(અહં બ્રહ્મૈવેદમિતિ તુર્યાતીતોઽજરોઽમરઃ) ॥ ૧૬॥

ધ્યાનધ્યેયાતિગો ભૂત્વા સ્થિતસ્સમહિમાતિગઃ ।
એવં સમ્ભાવયન્દેવ્યા શિવએવ હિ કેવલઃ ॥ ૧૭॥

તમઃ પરો મહાદેવો દેવ્યા સગુણનિર્ગુણઃ ।
પૂજાં બાહ્યોપચારાદ્યૈર્મનોવાચામગોચરઃ ॥ ૧૮॥

કલ્પયત્યેવ મનસા સર્વકાલેષુ શઙ્કરઃ ।
પ્રદોષેષુ વિશેષેણ કૈલાસે ચન્દ્રશેખરઃ ॥ ૧૯॥

તત્પૂજાં સાવધાનેન સમાહિતમનાશ્શ‍ૃણુ ।
ચતુર્દેહાતિગો ભૂત્વા સર્વેન્દ્રિયવિવર્જિતઃ ॥ ૨૦॥

અહમ્ભાવં પરિત્યજ્ય શિવોઽહં કેવલોઽદ્વયઃ ।
વ્યાપ્યેષુ વ્યાપકશ્ચાહં ગુણેષુ નિહતોસ્મ્યહમ્ ॥ ૨૧॥

નાન્તો નચાદિસ્સકલચાહં વિશ્વં સદૈવહિ ।
વિશ્વાતીતોહમજરોઽસઙ્ગોઽસઙ્ગવિવર્જિતઃ ॥ ૨૨॥

વ્યાપકોઽહં સદા પૂર્ણો ગુણજાલવિવર્જિતઃ ।
નીરૂપો વિશ્વભૂતાત્મા દેહધર્મવિવર્જિતઃ ॥ ૨૩॥

આકાશો વ્યાપકશ્શીર્યશ્શીર્ણેષ્વહમવસ્થિતઃ ।

સત્યં જ્ઞાનોઽહમાનન્દો બોધબોધકવર્જિતઃ ॥ ૨૪॥

મય્યેવ સકલં જાતં મયિ સર્વં પ્રતિષ્ઠિતમ્ ।
મયિ સર્વં લયં યાતિ તદ્બ્રહ્માદ્વયમસ્મ્યહમ્ ॥ ૨૫॥

ઇત્યેવં ભાવયન્ધીરો બાહ્યે લિઙ્ગં સમર્ચયેત્ ।
ધૃતભસ્મત્રિપુણ્ડ્રાઙ્ગો રુદ્રાક્ષવરભૂષણઃ ॥ ૨૬॥

પઞ્ચાસ્યધ્યાનનિરતઃ પઞ્ચાક્ષરપરાયણઃ ।
પ્રાઙ્મુખોદઙ્મુખોવાઽપિ સ્થિતશ્ચેલકુશાસને ॥ ૨૭॥

ધ્યાત્વા સ્વહૃત્પદ્મસંસ્થં શુદ્ધસ્ફટિકસન્નિભમ્ ।
પ્રસન્નાસ્યં ત્રિણયનં ત્રિપુણ્ડ્રપરિશોભિતમ્ ॥ ૨૮॥

ચન્દ્રાર્ધમુકુટં દેવં નીલગ્રીવમુમાપતિમ્ ।
આવાહયેદ્બાહ્યયલિઙ્ગે સ્ફાટિકે બાણધાતુજે ॥ ૨૯॥

મૃલ્લિઙ્ગે સિકતાયાઞ્ચ પૂજયેત્સ્થાવરેઽપિ ચ ।
પઞ્ચામૃતૈઃ પઞ્ચગવ્યૈર્નીરધારાદિભિશ્શિવમ્ ॥ ૩૦॥

પઞ્ચબ્રહ્મૈઃ પાવમાનૈ રુદ્રૈર્વેદસમુદ્ભવૈઃ ।
અભિષિચ્ય પ્રયત્નેન સામભિશ્ચ મહેશ્વરમ્ ॥ ૩૧॥

વસ્ત્રૈરાવેષ્ટ્ય તલ્લિઙ્ગં ગન્ધલેપેન લેપયેત્ ।
અક્ષતાભિસ્તથા રત્નગોલકૈર્ભૂષયેચ્છિવમ્ ॥ ૩૨॥

બિલ્વપત્રૈશ્ચ કહ્લારૈશ્ચમ્પકૈઃ કરવીરકૈઃ ।
પુષ્પૈરારણ્યકૈશ્ચૈવ તથાન્યૈશ્ચ સુગન્ધિભિઃ ॥ ૩૩॥

ધૂપૈશ્ચ દીપૈર્નૈવેદ્યૈસ્તામ્બૂલૈર્મણિદીપકૈઃ ।
નીરાજનૈશ્છત્રમુખ્યૈશ્ચામરૈર્વ્યજનૈરપિ ॥ ૩૪॥

પ્રણામસ્તોત્રપઠનૈઃ પ્રદક્ષિણસુનર્તનૈઃ ।
પુનઃ પ્રદક્ષિણૈશ્ચૈવ પઞ્ચાક્ષરજપૈસ્તથા ॥ ૩૫॥

હૃત્પદ્મે સન્નિવેશ્યેશં પૂજોદ્વાસનમારભેત્ ।
એવં પૂજાવિધાનેન પૂજયેત્પરમેશ્વરમ્ ॥ ૩૬॥

એકકાલં દ્વિકાલં વા ત્રિકાલં યોઽર્ચયેન્નરઃ ।
સ એવ લભતે જ્ઞાનમાભ્યન્તરવરાર્ચનૈઃ ॥ ૩૭॥

કૈલાસેશ્વરલિઙ્ગમેતદમલં સ્વર્ગાપવર્ગપ્રદં
તન્નૈવાખિલવેદજાલતિલકૈર્જ્ઞાતું ન તત્પાર્યતે ।
ઈશેનાપિ ગજાનનેન ચ મયા દેવ્યા ગણેન્દ્રૈરપિ
વિષ્ણુબ્રહ્મહરામરૈર્મુનિગણૈસ્તન્ત્રૈસ્તથૈવાગમૈઃ ॥ ૩૮॥

તલ્લેશાયુતલેશલેશમહિમા કોટ્યંશકોટ્યંશકં
વક્તું શ્રોતુમથેક્ષિતું ત્રિભુવને નાસ્તીતિ મન્યે દ્વિજ ॥ ૩૯॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે કૈલાસેશ્વરલિઙ્ગપૂજાકથનમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૩૬ - કૈલાસેશ્વરપૂજાવિધાનકથનમ્ । ૧-૩૯॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 36 - kailAseshvarapUjAvidhAnakathanam . 1-39..

Notes:
Skanda સ્કન્દ describes about the Saguṇa સગુણ and Nirguṇa નિર્ગુણ aspects of Śiva શિવ; and details about the Bāhyābhyantara pūjā બાહ્યાભ્યન્તર પૂજા (External and Internal worship) process of Kailāseśvaraliṅga કૈલાસેશ્વરલિઙ્ગ.
Śivarahasyam Aṃśaḥ-1 (Māheśvarākhya) શિવરહસ્યમ્ અંશઃ-૧ (માહેશ્વરાખ્ય) has several descriptions about Mount Kailāsa કૈલાસ શૈલ and Śiva શિવ. Selected verses from some of the chapters are presented here.

Encoded and proofread by Ruma Dewan

---

*Kailaseshvaralingapujakathanam*
pdf was typeset on December 19, 2023

Please send corrections to *sanskrit@cheerful.com*